M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 137

Title: Swarna Kurshana
Bhairava Kavacha

137

Swarnākarshana	Title
Bhairava Kavacha	Author
	Editor
	Year, Vols.
	Publisher
137	Remarks

पान
१

॥श्रीगणेशायनमः॥ श्री पार्वत्योवाच वदमे देव देवेश कवचं भैरवस्य
च यस्य विज्ञान मात्रेण साधकानाम् शिवं भवेत ॥१॥ श्री ईश्वर उवाच
शृणु देवी प्रवक्ष्यामि कवचं परमाद्भुतं स्वर्णाकर्षण देवस्य भैरवस्य
महात्मनः २ येन विज्ञान मात्रेण सर्व सिद्धीश्वरो भवेत वाकल्यो
त्तरोनाम कवचस्य ऋषिःशिवः ३ पंक्तिच्छंदो देवताच स्वर्णा
कर्षणि भैरवः सिद्धये सर्व कर्म णाम विनियोगः प्रकीर्तितः ४
शिरोमे भैरवःपातु ऐं ह्रीं श्रीं ऐं श्रियंचमे वदनं सकलं पातु
आपदुद्धारणायच ५ ग्रां ह्रीं ह्रूं कंठ देशंमे नाभिं लं वधन
स्यच लोकेश्वराय बाहूमे स्वर्णाकर्षण वै त्वचं ६ भैरवायेति
नाभिंमे मम दारिद्र्य शत्रवे विद्वेषणाय जठरं महाभैरवाय
नमः ७ पाद युग्मम् सदा पातु श्रीं ह्रीं ऐं बीज रूप धृक्

भैरवोमे सदापातु सर्वांगं सर्व संधिषु ॥८॥ भुवनेशो भुवःस्थाने
पृथिवीं सर्वथा लभेत् श्रियं श्रियतरं भूत्यै करोतु मम सर्वभाक् ९॥
पूर्वेमांपातु सततं भैरवश्च सितांगकः आग्नेयांतु रुरुर्नाम द
क्षिणे चंड भैरवः ॥१०॥ नैर्ऋते क्रोधनःपातु उन्मत्तः पातु पश्चिमे
कपाली वायु कोणेच उत्तरे भीषणःस्वयं ॥११॥ ईशे पातु सदा देवः सं
हारस्य महेश्वरः ऊर्ध्वेमे बटुकःपातु पाताले चरणायुधः ॥१२॥
ब्रह्माणी पुत्रकः पातु माहेशि पुत्रकः श्रियं कौमारी पुत्रको बंधु वै
ष्णवी पुत्रकोधनं ॥१३॥ वाराही पुत्रको विद्या सर्वदा परि रक्षतु
इंद्राणी पुत्रको भ्रातृं चामुंडा पुत्रकः कुलं ॥१४॥ महालक्ष्मी सुतः
पातु राजद्वार सुरालयेत सर्वतः सर्वदापातु चरणायुध भैरवः ॥१५॥
इतिते कथितं देवि कवचं सर्व सिद्धिदं सर्वरक्षाकरं देवि

॥

समस्त पुरुषार्थदं ॥१६॥ कंठेवाबाहुमूलेवा मस्तके हृदये पिच
श्रीसमानेषु देवेशि साधकः शिवतां व्रजेत् ॥१७॥ इच्छासिद्धिः
प्रतापेन कल्पवृक्षश्च जायते पठनस्यच महात्म्यं श्रृणुष्व कम
लानने ॥१८॥ पूजां विधाय विधिवत् प्रणम्य गुरुपादुकां श
तावृत्त पठे द्देविकवचं वासनात्कविः ॥१९॥ एवं दशदिनं ज
प्त्वा विवादे विजयो भवेत् माससमात्रेण जायते सर्वविद्या
सुपारगः ॥२०॥ द्विमासे कविराड् देवि त्रिमासे सर्व संपदः चतु
र्मासेस्तु संसिद्धि जायते कवचस्यच ॥२१॥ एवं संवत्सरं ज
प्त्वा स्वर्णाकर्षण तां व्रजेत बहुनाचाकिमुक्तेन शिवतु
ल्यो [illegible] वयं ॥२२॥ पंच [illegible] देवाशि नवकुं शक्यतमया
[illegible]

यिने ॥२६॥ नमः प्रसन्नरूपाय आदिदेवाय तेनमः नमस्ते मं
त्ररूपाय नमस्ते रत्नरूपिणे ॥२७॥ नमस्ते स्वर्णरूपाय सुवर्णाय
नमोनमः नमः सुवर्ण वर्णाय महापुण्याय तेनमः ॥२९॥ नमःशु
द्धाय बुद्धाय नमः संसार तारिणे नमो देवाय गुह्याय प्रबलाय
नमोनमः ॥३०॥ नमस्ते बलरूपाय परेषां बल नाशिने नमस्ते
स्वर्ण संस्थाय नमो भूलोकवासिने ॥३१॥ नमः पाताळवासाय
अनाधारायतेनमः नमोनमस्ते शांताय अनंताय नमोनमः ॥३२॥
द्विभुजाय नमस्तुभ्यं भुजत्रय सुशोभिने नमोणिमादि सिद्धाय
स्वर्णहस्तायतेनमः ॥३३॥ पूर्णचंद्र प्रतिकाश वदनांभोज शोभि
ने नमस्ते स्वर्णरूपाय स्वर्णालंकार शोभिने ॥३४॥ नमःस्वर्णा
कर्षणाय स्वर्णाभायनमोनमः नमस्ते स्वर्णकंठाय स्वर्णाभांबरधा

रिणे ॥३५॥ स्वर्णसिंहासनस्थाय स्वर्णपादाय ते नमः नमस्स्वर्णाभिधा
राय स्वर्ण कांचि सुशोभिने ॥३६॥ नमस्ते स्वर्ण जंघाय भक्त का
म दुधात्मने नमस्ते स्वर्ण भक्तानां कल्प वृक्ष स्वरूपिणे ॥३७॥
चिंतामणि स्वरूपाय नमो ब्रह्मादि सेविते कल्पद्रुमाधः संस्था
य बहुस्वर्ण प्रदायिने ॥३८॥ भयकालाय भक्तानां सर्वाभीष्ट
प्रदायिने नमो हेमाकर्षणाय भैरवाय नमो नमः ॥३९॥ स्तवेनाने
न संतुष्टो भव लोकेश भैरव पश्यमां करुणा विष्ट शरणागत
वत्सलः ॥४०॥ श्री भैरव धना ध्यक्ष शरणं त्वां भजाम्यहम्
प्रसीद सकलान् कामान् प्रयच्छ मम सर्वदा ॥४१॥ श्री महा
भैरवस्येदं स्तोत्रमुक्तं सुदुर्लभं मंत्रात्मकं महापुण्यं सर्वैश्व
र्य प्रदायकं ॥४२॥ यः पठेन्नित्य मेकाग्रं पातकैः स विमुच्यते

लभतेच महतिं लक्ष्मी मष्टैश्वर्यण्य वाप्नुयात् ॥४३॥ चिंता
मणिमवाप्नोति धेनुं कल्पतरुं ध्रुवं स्वर्णराशीमवाप्नोति शी
घ्र मेव समानवः ॥४४॥ संध्यायां यः पठेत्स्तोत्रं दशावृत्त्या न
रोत्तमः स्वप्ने श्री भैरवस्तस्य साक्षात् भूत्वा जगद्गुरुः ॥४५॥
स्वर्ण राशिं ददात्येव तत्क्षणं नास्ति संशयः सर्वदा यः पठेत्
स्तोत्रं भैरवस्य महात्मनः ॥४६॥ लोकत्रयं वशी कुर्यादचलां
श्रियमाप्नुयात न भयं लभते क्वापि विघ्न भूतादि संभवं
॥४७॥ म्रियंते शत्रवो यस्य मलक्ष्मी नाशमाप्नुयात अक्षयं
लभते सौख्यं सर्वदा मानवोत्तमः ॥४८॥ अष्ट पंच दशाणा
ढ्यो मंत्रराज प्र कीर्तितः दारिद्र्य दुःख शमन स्वर्णा कर्षण

पान ६

कारकः यएनं संजये द्धीमान् स्तोत्रं वा प्रपठेत् सदा महा
भैरव सायुज्यं सोंत काले लभे द्धुवं ॥५०॥ इतिश्री रुद्रया
मले स्वर्णाकर्षण स्तोत्रं संपूर्णम्-

137